**MEDHĀMANTHAN** ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# The Exposition of the Six Chakras in the Vivekamārtaṇḍa of Viśvarūpadeva

## विश्वरूपदेवविरचितविवेकमार्तण्डग्रन्थे षड्चक्रनिरुपणम्

***Susanta Halder***
*Research Scholar, Department of Advaita Vedanta*
*National Sanskrit University, Tirupati*
*Email: susantahalder92@gmail.com*
*Page No: 86-91*

***Abstract:*** *This paper explores the exposition of the subtle energy centers (cakras) in Haṭhayoga, focusing on Viśvarūpadeva's Vivekamārtaṇḍa alongside Pūrṇānanda Yati's Ṣaṭcakranirūpaṇa. While traditional texts delineate diverse schemes—ranging from four to thirty-two centers—the classical six-fold hierarchy remains authoritative. The study highlights Viśvarūpadeva's specific focus on the foundational triad: Mūlādhāra (the seat of Kāmarūpa, Svayambhū-liṅga, and dormant Kuṇḍalinī), Svādhiṣṭhāna (the vital matrix of Prāṇa at the root of the genitals), and Maṇipūra (the navel-based solar-fire plexus presiding over cosmic balance). Furthermore, it contextualizes the remaining three centers—Anāhata, Viśuddhi, and Ājñā—delineating their presiding Śaktis (Kākinī, Śākinī, Hākinī), elemental mandalas, and esoteric significance. Ultimately, the paper demonstrates how the systematic mastery of these cakras transcends physical discipline, serving as an indispensable interiorized pathway to suppress mental fluctuations (cittavṛttinirodha), facilitate the ascent of spiritual consciousness, and attain final liberation (mokṣa) in the supreme divine reality.*
**Keywords:** *Vivekamārtaṇḍa, Ṣaṭcakranirūpaṇa, Haṭhayoga, Kuṇḍalinī, Cittavṛttinirodha.*

हठयोगशास्त्रे शरीरे षड्चक्राः भवन्ति मूलाधार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्धि-आज्ञा-भेदेन। यद्यपि षड्चक्रविषये वर्णनं सर्वत्र विद्यते, तथापि अत्र मूलाधार-स्वाधिष्ठान-मणिपूरक-चक्रविषये एव वर्णनं दृश्यते। आधाराख्यप्रथमचक्रस्वाधिष्ठानाख्यद्वितीयचक्रयोः मध्ये योनिस्थानं कामरूपं निगद्यते। गुदस्थाने आधाराख्ये यत् चतुर्दलं पङ्कजमस्ति तन्मध्ये योनिः विराजते, या सिद्धवन्दिता कामाख्या च नाम्ना व्यवह्रियते। सः एव योगी भवति यः योनिमध्ये पश्चिमाभिमुखं स्थितं महालिङ्गं पश्यति।

धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः लोके प्रसिद्धाः भवन्ति। तत्सम्पादयितुम् आस्तिकपुरुषः सर्वथा प्रयतते। नास्तिकास्तु अर्थकामाभ्यां तृप्तो भवन्ति। तथापि तस्य जीवने शान्तिः भवति न वेति निश्चेतुं वयं न शक्नुमः। आस्तिकाः कर्म कुर्वन्ति फलं दैवायत्तं निश्चित्य फललाभे दैवमनुकूलमिति तृप्ताः भवन्ति। कार्यनाशे देवः नानुकूलमिति विषण्णोऽपि निश्चिन्ताः अपि भवन्ति। यस्य श्रद्धा भवति सः कार्याद्विफलोऽपि न विरमति। एवं कार्यसाधनार्थं नित्याभियोगः एव योगः भवतीति लोके प्रसिद्धः। किन्तु मुमुक्षूणां विषये चित्तवृत्तिनिरोधः योगः लौकिकव्यवहारे भगवदुक्तदिशा "योगः कर्मसु कौशलम्[1]" इति गीतासु उपदिष्टः एषोऽर्थः कार्यसाधने ऐहिकस्य आमुष्मिकस्य वा कार्यस्य भवति साधकः।

मानवजीवने साफल्यं प्राप्तुं योगमार्गः अनुसरणीयः। तदुक्तं योगसूत्रे "अथ योगानुशासनम्[2]" इति। "योगः चित्तवृत्तिनिरोधः[3]" इति द्वितीयसूत्रेण योगस्य निरूपणं कुर्वन् चित्तवृत्तिनिरोधस्य महत्त्वं प्रयोजनं च प्रतिपादितमाचार्येण भगवता पतञ्जलिना। मानवस्य सर्वाणि कार्याणि चित्तं मनः प्रभावयति। अतः मनसः नियन्त्रणं नितान्तम् आवश्यकम्। नियन्त्रितमनसा कार्यकरणे जीवने सफलता लभ्यते। चित्तवृत्तिनिरोधः प्राणायामेन सम्भवतीति योगशास्त्रे निरूपितः वर्तते। हठयोगग्रन्थेषु हठयोगप्रदीपिका प्राचीना प्रसिद्धा चास्ति। हठयोगशास्त्रमनुसृत्य एव विश्वरूपदेवेन विवेकमार्ताण्डग्रन्थः निरमायि। भारतीयाः त्रिवर्गादपि मोक्षे श्रद्धधानाः भवन्ति मोक्षस्य परमपुरुषार्थत्वात्। त्रिवर्गेण मोक्षः साध्यः इति येषाम् अभिलाषा, ते मोक्षोपायेषु कः प्रशस्तः इति अन्विष्यन्ति। वेदान्तमार्गः दुर्भेद्यः निर्गुणो ब्रह्मोपासनं सर्वेषां न साध्यम्। भक्तिमार्गः सुलभोऽपि सुस्थिरमनस्कानां भक्तिरेव फलदायिनी भवति। तदुक्तं श्रीमद्भगवद्गीतायाम् —

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

"अनन्याः चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यम्॥"[4] इति॥

योगः अलब्धलाभः, क्षेमं लब्धस्य रक्षणं, तत्र अनन्यशब्दः बह्वर्थकः अन्यचिन्ता, अन्यदेवासक्तिः, अन्यविषयचिन्ता इत्यादि भगवद्भिन्नाः सर्वे अन्यशब्दवाच्याः। एवम् अनन्यचिन्तासाधनाय चित्तवृत्तिनिरोधः कार्य एव, तादृशचित्तवृत्तिनिरोधः एव योगः। भक्तिज्ञानवैराग्येषु अन्यतमः। इतरद्वयस्य निमित्तं भवति योगस्तु त्रितयस्यापि कारणं भवति। योगोऽपि क्रियायोगः, हठयोगः इति मुख्यतया द्विधो भिन्नः। इतरेषां योगभेदानां सत्वेऽपि ते न प्रसिद्धाः। क्रियायोगः हठयोगापेक्षया सात्विकोऽपि दीर्घेन कालेन साध्यो भवति। हठयोगाचरणं साध्यम्। लोके हठशब्दः दुराग्रहः इत्यर्थे रूढः। किन्तु योगदर्शनविषये स्थिराभिनिवेशः इति ग्राह्यः। हकारः सूर्यः, ठकारः चन्द्रः तयोः योगः हठः इति वैचित्री विद्वत्कल्पिता। एवं योगदर्शने हठयोग शाखायाः बहवो ग्रन्थाः लभ्यन्ते। अद्यतनकाले नूतनतया प्रकाशिताश्च लभ्यन्ते। हठयोगग्रन्थेषु स्वात्मरामयोगी विरचिता हठयोगप्रदीपिका प्राचीनतमा वर्तते, तस्मिन् सम्प्रदाये विवेकमार्ताण्डः ग्रन्थः अन्यतमः।

**षड्चक्रनिरूपणम् –**

**वैष्णवपाञ्चरात्रागमस्य** सात्वतसंहितायां चतुर्णां चक्राणां विषये उल्लेखः विद्यते।[5] तत्र तत्रत्याः भाष्यकाराः आधारनाभिहृदयकण्ठस्थानेषु स्थितानां चक्राणां विषये वर्णयन्ति। बौद्धानां वसन्ततिलकग्रन्थेऽपि एतेषां चतुर्णां चक्राणां विषये एव वर्णनं विद्यते। तत्र क्रमशः एतेषां नाम निर्माणचक्रं, धर्मचक्रं, सम्भोगचक्रं, महासुखचक्रं च। बौद्धानां कालचक्रतन्त्रे चक्राणां संख्या षट् विद्यते। गुह्योष्णीषचक्रयोः विषये अतिरिक्ततया तत्र वर्णनं विद्यते। एतेषां विषये विशदरूपेण व्याख्या कालचक्रतन्त्रस्य विमलप्रभानामकटीकायां प्राप्यते। तस्यां टीकायाम् अष्टादशचक्राणामपि वर्णनं विद्यते।[6] योगिनीहृदयस्य दीपिकाटीकायां द्वात्रिंशच्चक्राणां विषये वर्तते।[7] योगिनीहृदये नवचक्राणां विषयेऽपि वर्णनं विद्यते। तैः सह षड्चक्राणां विषयेऽपि वर्तते।[8] यद्यपि नेत्रतन्त्रेऽपि षड्चक्राणां विषये वर्णनं विद्यते तथापि प्रतिपादनशैली तत्र भिन्ना वर्तते।[9] अनेन प्रकारेण चक्राणां संख्याविषये स्वरूपविषये च योगशास्त्रे तन्त्रशास्त्रे च वैविध्यं यद्यपि दृश्यते तथापि श्रीतत्त्वचिन्तामणिग्रन्थानुसारेण सौन्दयलहर्याः लक्ष्मीधरटीकानुसारेण मूलाधार-स्वाधिष्ठान-मणिपूर-अनाहत-विशुद्धि-आज्ञाचक्राणां विषये एव उल्लेखः प्राप्यते। कालचक्रतन्त्रे, तट्टीकायां, योगिनीहृदये, तद्व्याख्यायां, नेत्रतन्त्रे च एतेषां षड्चक्राणां विषये एव वर्णनं विद्यते। पूर्णानन्दयतिविरचितषड्चक्रनिरुपणात्मके ग्रन्थे विवेकमार्ताण्डग्रन्थे च एतेषां विषये सम्यक् वर्णनं विद्यते।

**मूलाधारचक्रनिरुपणम् —**

षड्चक्रेषु अस्य प्राथम्यात् मूलाधारसंज्ञां भजते।[10] चक्रमिदं सुषुम्नामुखेन संलग्नं विद्यते। ध्वजस्य अधोभागे तथा गुदायाः उर्ध्वभागे अस्य स्थितिः। चतुर्दलयुतमिदं चक्रम्। यथोच्यते—

"अथाधारपद्मं सुषुम्नास्यलग्नं ध्वजाधो गुदोर्ध्वं चतुःशोणपत्रम्।
अधोवक्त्रमुद्यत्सुवर्णाभवर्णैर्वकारादिसान्तैर्युतं वेदवर्णैः॥"[11] इति॥

एतत् चक्रं डाकिनीदेव्याः निवासस्थानम् अस्ति। चतुर्भुजभूषिता, अस्याः नेत्रं रक्तवर्णयुक्तं वर्तते। उदयमानसूर्यप्रकाश इव सा दीप्तिमत्। शुद्धबुद्धिं तत्त्वज्ञानं च नित्यं प्रकाशयति।[12] अस्य आधारकमलस्य दलमध्ये त्रैपुरमस्ति, त्रिपुरानाम्ना सम्बन्धित्वात् ज्ञायते। वज्रनाडी चतुष्कोणे प्रकाश्यते। सदा विद्युत् इव उज्ज्वलं तिष्ठति। अत्र ज्योतिः अत्यन्तं मृदु, अत्र कामपीठः वर्तते। त्रिकोणरूपमिदं मध्यसंस्थं, कन्दर्पवायुः निरन्तरतया वर्तते। स एव अत्र सर्वभूतानां स्वामी जीवेश उच्यते। अस्य तेजः कोटिसूर्यसमानम् इव । वायुः अत्र नित्यः सर्वव्यापी च। अस्य वर्णः रक्तः वर्तते।[13] अस्य केन्द्रे अस्मात् कोणात् किञ्चित् उपरि स्वयम्भूः अस्ति। सः द्रुतकनककलाकोमलः पश्चिमास्यो ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः विद्युत्पूर्णेन्दु-बिम्बप्रकरकरचयस्निग्धसन्तानहासी च वर्तते।[14] तस्मात् शिवस्य उपरि अर्थात् स्वयंभूलिंगस्य उपरि सूक्ष्मा सुप्ता कुण्डलिनी पद्मसूत्रसदृशी विद्यते। एषा संसारस्य मोहिनीरूपा महामायारूपा च। ब्रह्मद्वारस्य मुखं स्वमुखेन आच्छादयति। सा सम्पूर्णतया आवृणोति इत्यर्थः। एवं अमृतप्रवाहं अवरुद्ध्य स्वयम् अमृतस्य पानं करोति।[15] तत्कुण्डलिनीमध्यस्थपरशक्तिस्वरूपविषये

MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

उच्यते— कुण्डलिनीमध्ये परमकला विद्यते। एषा परमेश्वरी नाम्ना उच्यते। सा अत्यन्तं कुशला अस्ति। सूक्ष्मातिसूक्ष्मा परा च। तस्याः जगतः निर्माणे कौशलम् अतुलनीयम् अस्ति। अनाद्यानन्दप्रवाहात् यत् प्रवहति अमृतं, तस्य ग्रहणम् एषा परमेश्वरी करोति। तस्याः ज्योतिः पीयूषधाराधरा इव प्रभा अस्याः। तस्याः प्रकाशः जगत् प्रकाशयति। तस्याः शरीरं ब्रह्माण्डः इति उच्यते। ये गुणाः विश्वे स्मृताः ते तस्याः शरीरे अपि वर्तन्ते। अनया शाश्वतं ज्ञानं परमात्मनो जायते। उच्यते-

"तन्मध्ये परमा कलाऽतिकुशला सूक्ष्मातिसूक्ष्मा परा
नित्यानन्दपरम्परातिविगलत् पीयूषधाराधरा।
ब्रह्माण्डादिकटाहमेव सकलं यद्भासया भासते
सेयं श्रीपरमेश्वरी विजयते नित्यप्रबोधोदया॥"[16] इति॥

एतत्सर्वं मनसि निधाय विवेकमार्ताण्डकारः लिखति—

"आधारं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकम्।
योनिस्थानं तयोर्मध्ये कामरूपं निगद्यते॥
आधाराख्ये गुदस्थाने पङ्कजं यच्चतुर्दलम्।
तन्मध्ये प्रोच्यते योनिः कामाख्या सिद्धवन्दिता॥
योनिमध्ये महालिङ्गं पश्चिमाभिमुखं स्थितम्।
मस्तके मणिवद् भिन्नं यो जानाति स योगवित्॥"[17] इति॥

**स्वाधिष्ठानचक्रनिरुपणम्—**

षड्चक्रेषु द्वितीयं चक्रं विद्यते स्वाधिष्ठानचक्रम्। मेढ्रस्य आधारे स्वाधिष्ठानपद्मम् अस्ति। इदं पद्मं सुषुम्नामध्ये जननेन्द्रियस्य मूले स्थितम्। सिन्दूरवर्णयुतं वर्तते। अस्य पद्मस्य षट्दलेषु व-भ-म-य-र-लवर्णाः सन्ति, एतेषु अक्षरेषु चन्द्रबिन्दुः अस्ति। एते विद्युत्सदृशवर्णाः भवन्ति। तेषाम् आभा अपि विद्युत् इव भवति। अक्षराणां अन्तिमाक्षरं लवर्णः वर्तते। चन्द्रबिन्दुकारणात् प्रकाशमानं भवति। उच्यते—

"सिन्दूरपूररुचिरारुणपद्ममन्यत् सौषुम्णमध्यघटितं ध्वजमूलदेशे।
अङ्गच्छदैः परिवृतं तडिदाभवर्णैर्वाद्यैः सबिन्दुलसितैश्च पुरन्दरान्तैः॥"[18] इति॥

अत्रैव राकिनी नित्यं निवसति। कृष्णवर्णा सा कृष्णाम्बुजवत्। उच्यते-

"अत्रैव भाति सततं खलु राकिणी सा नीलाम्बुजोदरसहोदरकान्तिशोभा।
नानायुधोद्यतकरैर्लसिताङ्गलक्ष्मीर्दिव्याम्बराभरणभूषितमत्तचित्ता॥"[19] इति॥

विवेकमार्ताण्डग्रन्थे स्वाधिष्ठानस्य व्युत्पत्तिं प्रदर्शयन्ति। तेन तस्य सार्थकत्वमपि ज्ञायते। यथा—

"स्वैशब्देन भवेत् प्राणो ह्यधिष्ठानं तदाश्रयः।
स्वाधिष्ठानाख्यया तस्मान्मेढ्रमेवाभिधीयते॥[20]
स्वाधिष्ठानमिदं चक्रं मेढ्रमेव निगद्यते।
तेन्तुना मणिवत् प्रोतं पूर्यते यत्र वायुना॥"[21] इति॥

**मणिपूरचक्रनिरुपणम्—**

मणिपुरचक्रं चक्राणां मध्ये तृतीयचक्रम्। नाभेः पृष्ठतः स्थितम् अस्ति। उच्यते—

"तन्नाभिमण्डले चक्रं प्रोच्यते मणिपूरकम्।"[22] इति॥

अस्य आधारतत्त्वम् अग्निः वर्तते। स्वाधिष्ठानस्य उपरि अर्थात् नाभिमूले दशकमलानि प्रकाशन्ते। तस्य ज्योतिः जलपूर्णः गुरुमेघ इव। अत्र अग्निदेशं ध्यायेत्। अग्निमण्डलमिदम् आकाशे त्रिकोणात्मकः। तस्य ज्योतिः उदितसूर्यज्योतिरिव।

"तस्योर्ध्वे नाभिमूले दशदललसिते पूर्णमेघप्रकाशे

नीलाम्भोजप्रकाशैरुपहितजठरे डादिफान्तैः सचन्द्रैः।
ध्यायेद् वैश्वानरस्यारुणमिहिरसमं मण्डलं तत् त्रिकोणं
तद्बाह्ये स्वस्तिकाख्यैस्त्रिभिरभिलसितं तत्र वह्नेः स्वबीजम्॥"[23] इति॥

चक्राणां तत्त्वं यावन्न ज्ञायते तावत्पर्यन्तं मनुष्यः संसारे एव पौनःपुन्येन पतति। तदर्थं चक्राणां स्थानविषयेऽपि तत्र तत्र ग्रन्थकारः निर्दिशति। यथा मणिपूरचक्रविषये उच्यते—

"तावज्जीवो भ्रमत्येव यावत्तत्वं न विन्दति।
ऊर्ध्वं मेढ्रादधो नाभेः कन्दो योऽस्ति खगाण्डवत्॥"[24] इति॥

इदं कमलं प्रसिद्धां लाकिनीं चित्रयति। सा कीदृशी अस्ति इति चेत् सा सर्वेषां कल्याणं सौभाग्यं च जनयति। तस्याः चत्वारः बाहुः सन्ति। तस्याः शरीरस्य सर्वे भागाः उज्ज्वलाः, दीप्ताः च सन्ति। पीतवस्त्रधारिणी नानारत्नालंकारविभूषिता च। तस्याः वर्णः कृष्णवर्णः तथा मत्तचित्ता सा वर्तते। अमृतपानेन प्रहृष्टा भवति। अस्य मणिपुरपद्मस्य ध्यानेन जगतः नाशस्य निर्माणस्य च सामर्थ्यं प्राप्नोति। वाग्ज्योतिः तस्याः मुखाम्बुजे सदा तिष्ठति। सा वाग्ज्योतिः ज्ञानस्य तत्त्वम्। ब्रह्मविष्णुशिवसमो भवतीति निश्चप्रचं वक्तुं शक्यते।

उच्यते च—

"अत्रास्ते लाकिनी मा सकलशुभकरी वेदबाहूज्ज्वलाङ्गी
श्यामा पीताम्बराद्यैर्विविधविरचनालङ्कृता मत्तचित्ता।
ध्यात्वैतन्नाभिपद्मं प्रभवति नितरां संहृतौ पालने वा
वाणी तस्याननाब्जे निवसति सततं ज्ञानसन्दोहलक्ष्मीः॥"[25] इति॥

विवेकमार्ताण्डग्रन्थे मूलाधारस्वाधिष्ठानमणिपूरचक्राणां विषये एव वर्णनं विद्यते। अनाहतविशुद्ध्याज्ञाचक्राणां विषये वर्णनं न प्राप्यते। इतरग्रन्थेषु एतेषां परिचयः विद्यते, तिसृणां परिचयः अत्र संक्षेपेण अत्र प्रदीयते।

**अनाहतचक्रनिरुपणम्—**

मणिपूरपद्मस्य उपरि हृदयप्रदेशे अनाहतनामकं कमलम् अस्ति। चतुर्थं चक्रमिदम्। बन्धुकपुष्पसदृशं दीप्तं तेजस्वी सिन्दूरवर्णसदृशं च भवति। अत्र 'क'-अक्षरात् आरभ्य द्वादशाक्षराणि सन्ति। तत्र अन्ते 'ट'-इति अक्षरम्। इदं पद्मं कल्पवृक्षसदृशं वर्तते, अतः सर्वकामान् पूरयति। एतदतिरिक्तं मोक्षमपि ददाति। अत्रैव वायुमडलम् अस्ति। धूमसदृशं षट्कोणीयं वर्तते। अस्य वर्णः अपि धूम्रवर्णवत्। उच्यते—

"तस्योर्ध्वे हृदि पङ्कजं सुललितं बन्धुककान्त्युज्ज्वलं
काद्यैर्द्वादश वर्णकैरुपहितं सिन्दूररागान्वितैः।
नाम्नाऽनाहतसंज्ञकं सुरतरुं वाञ्छातिरिक्तप्रदं
वायोर्मण्डलमत्र धूमसदृशं षट्कोणशोभान्वितम्॥"[26] इति॥

पद्मकर्णिकास्थकाकिनीशक्तिस्वरूपविषये उच्यते अस्मिन् कमले काकिनी निवसति। तस्याः वर्णः नवविद्युत् इव पीतः अस्ति। तस्याः त्रीणि नेत्राणि सन्ति। सा शुभा हितकरी च। सा सर्वाभरणैः अलङ्कृता अस्ति। सदैव सुखी आनन्दिता च भूत्वा जनानां कृते सर्वविधं कल्याणं लाभप्रदं च कार्यं कुर्वती अस्ति, तस्याः चत्वारः बाहुः सन्ति। पाशं कपालं च धारयन्ती अभयमुद्रायां सा तिष्ठति। सुधारसामृतपानेन मत्ता रसेन आर्द्रा च। एषा अस्थिमालां धारयति।[27]

**कण्ठस्थ-विशुद्धचक्रनिरुपणम्—**

चक्राणां मध्ये पञ्चमं चक्रं विशुद्धं वर्तते। अत्यन्तं शुद्धं भवति। पद्मकण्ठे विराजते। अस्य कान्तिः धूमवत्। अस्य रक्तदलेषु सर्वे षोडशदीप्तिमत्स्वराः प्रकाशन्ते। यस्य बुद्धिः तीव्रप्रकाशिता अस्ति तस्य स्पष्टतया ज्ञायते। अस्मिन् कमले शुक्लवर्णात्मकः आकाशः, यः पूर्णचन्द्रसदृशः प्रकाशितः वर्तते, इदं मण्डलाकारं वर्तते। आकाशस्य बीजं शुद्धं यत् वर्तते तत् गजस्य उपरि

स्थितम्। उच्यते—

"विशुद्धाख्यं कण्ठे सरसिजममलं धूमधुम्रावभासं
स्वरैः सर्वैः शोणैर्दलपरिलसितैर्दीपितं दीप्तबुद्धेः।
समास्ते पूर्णेन्दुप्रथिततमनभोमण्डलं वृत्तरूपं
हिमच्छायानागोपरि लसिततनोः शुक्लवर्णाम्बरस्य॥"[28] इति॥

पद्मकर्णिकास्थशाकिनीशक्तिस्वरूपविषये उच्यते— अस्मिन् शुद्धे कमले शक्तिः शाकिनी वसति। तस्याः वस्त्रं पीतं भवति। सा सर्वेभ्यः शुद्धतमा अस्ति। अमृताब्धिमृतात् अपि शुद्धा, बाणपाशधनुषाङ्कुशविभूषिता। अस्य पद्मस्य पल्लवेषु चन्द्रस्य समस्तमण्डलम् अस्ति। सर्वथा निर्मलं भवति अर्थात् शशचिह्नम् अत्र न वर्तते। कमलमिदं मुक्तिद्वारम् अर्थात् ये संयमाः सन्ति, तेषां मोक्षद्वारम् इदम्।[29]

**भ्रूमध्यस्थिताऽऽज्ञाचक्रनिरुपणम् —**

आज्ञापद्मं भ्रूमध्ये स्थितम् इति सुप्रसिद्धमिदं षष्ठं पद्मम्। चन्द्रसदृशमिदं ध्यानस्थानत्वेन प्रकाशते। ह-क्ष-अक्षरे अत्र भवतः, तस्य तेजः अधिकं प्रकाशयतः। नेत्रपत्रसदृशं भवति अर्थात् अस्य पद्मस्य द्वे पत्रे स्तः। अस्मिन् कमले वसति प्रसिद्धा हाकिनी। सा चन्द्रसदृशा श्वेता षड्वक्त्रा च। तस्याः षट् हस्ताः सन्ति, विद्यामुद्रा-ज्ञानमुद्रा-वरदमुद्रा-अभयमुद्रायुक्ताः। शेषौ हस्तौ कपालं लघुदुन्दुभिं च धारयत। सा सर्वथा शुद्धचित्ता। उच्यते—

"आज्ञानामाम्बुजं तद्धिमकरसदृशं ध्यानधामप्रकाशं
हक्षाभ्यां वै कलाभ्यां परिलसितवपुर्नेत्रपत्रं सुशुभ्रम्।
तन्मध्ये हाकिनी सा शशिसमधवला वक्त्रषट्कं दधाना
विद्यां मुद्रां कपालं डमरुजपवटीं बिभ्रती शुद्धचित्ता॥"[30] इति॥

अस्य चक्रस्य ऊर्ध्वभागे प्रणवस्य निरन्तरनिवासः अस्ति। अयं प्रणवः ओंकाररूपेण प्रकाशमानः अ-उ-म-अक्षरैः निर्मितः अस्ति।[31] आज्ञाचक्रे परमः शिवः वर्तते, तस्मिन्विषये निगद्यते— अत्र योगी वह्निकणस्य अवान्तररूपेण ज्वलन्तदीपरूपं प्रकाशं पश्यति। अत्र आकाशस्य पृथिव्याः बीजस्य च मध्ये ज्योतिः स्थिता वर्तते। तस्य ज्योतिः उदितसूर्यज्योतिसमाना। अस्मिन् स्थाने अर्थात् यत्र चैतन्यः लीनः भवति तत्र भगवतः साक्षात्कारः भवति। अत्र सः पूर्णवैभवेन प्रज्ञातया च व्यज्यते। सः अविच्छिन्नः, अतः सर्वेषां साक्षी। सः परः शिवः अत्रैव अस्ति। वह्निचन्द्रसूर्यमण्डल इव प्रकाशते।[32] आज्ञाचक्रे योगेन प्राणत्यागफलजिज्ञासायाम् उच्यते— इदं विष्णोः अतुलनीयं मधुरं रमणीयं च धाम वर्तते। आत्माविरहसमये उत्तमः योगी सुखेन आत्मानं अत्र स्थापयति, तथा देहत्यागानन्तरं परमपुरुषे प्रवेशयति। तदानीं निर्वाणं नाम स्वस्वरूपं प्राप्नोति। सः सर्वेषां अन्तः आत्मा अस्ति। अनादिः अविनाशी च पारमार्थिकः जन्मादिविकाररहितः पुरातनः सृष्टिस्थितिलयकारणः भवति, यः वेदान्तविदितः वर्तते।[33]

## Endnotes

1. भ.गी. २/५०
2. यो.सू १/१
3. यो.सू. १/२
4. भ.गी, ९/२२
5. सात्वर्तसंहिता २/५८
6. विमलप्रभा पृ. १६९
7. दीपिका टीका पृ. ३४-३७
8. योगिनीहृदये ३/३०
9. नेत्रतन्त्र ७/२८-२९

MEDHĀMANTHAN 2026
MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

10. आधारं प्रथमं चक्रम् वि.मा. ६/११
11. षड्चक्रनिरूपणम् १/४
12. वसेदत्र देवी च डाकिन्यभिख्या लसद्वेदबाहूज्ज्वला रक्तनेत्रा। समानोदितानेकसूर्यप्रकाशा प्रकाशं वहन्ती सदा शुद्धबुद्धेः॥ षड्चक्रनिरूपणम् १/७
13. वज्राख्यावक्त्रदेशे विलसति सततं कणिकामध्यसंस्थं, कोणं तत् त्रैपुराख्यं तडिदिव विलसत्कोमलं कामरूपम्। कन्दर्पो नाम वायुर्निवसति सततं तस्य मध्ये समन्ताज्जीवेशो बन्धुजीवप्रकरमभिहसन् कोटिसूर्यप्रकाशः॥ षड्चक्रनिरूपणम् १/८
14. तन्मध्ये लिङ्गरूपी द्रुतकनककलाकोमलः पश्चिमास्यो, ज्ञानध्यानप्रकाशः प्रथमकिसलयाकाररूपः स्वयम्भूः। विद्युत्पूर्णेन्दुबिम्बप्रकरकरचयस्निग्धसन्तानहासी, काशीवासी विलासी विलसति सरिदावर्तरूपप्रकारः॥ षड्चक्रनिरूपणम् १/९
15. तस्योर्ध्वे बिसतन्तुसोदरलसत्सूक्ष्मा जगन्मोहिनी, ब्रह्मद्वारमुखं मुखेन मधुरं सञ्छादयन्ती स्वयम्। शङ्खावर्तनिभा नवीनचपलामालाविलासास्पदा, सुप्ता सर्पसमा शिवोपरि लसत्सार्द्धत्रिवृत्ताकृतिः॥ षड्चक्रनिरूपणम् १/१०
16. षड्चक्रनिरूपणम् १/१२
17. वि.मा. ६/११-१३
18. षड्चक्रनिरूपणम् २/१४
19. षड्चक्रनिरूपणम् २/१७
20. वि.मा. ६/१५
21. वि.मा. ६/१६
22. वि.मा.६/१७
23. षड्चक्रनिरूपणम् ३/१९
24. वि.मा.६/१८
25. षड्चक्रनिरूपणम् ३/२१
26. षड्चक्रनिरूपणम् ४/२२
27. अत्रास्ते खलु काकिनी नवतडित्पीता त्रिनेत्रा शुभा, सर्वालङ्करणान्विता हितकरी सम्यग्जनानां मुदा। हस्तैः पाशकपालशोभनवरान् संबिभ्रती चाभयं, मत्ता पूर्णसुधारसार्द्रहृदया कङ्कालमालाधरा॥ षड्चक्रनिरूपणम् ४/२४
28. षड्चक्रनिरूपणम् ५/२८
29. सुधासिन्धोः शुद्धा निवसति कमले शाकिनी पीतवस्त्रा, शरं चापं पाशं सृणिमपि दधती हस्तपद्मैश्चतुर्भिः। सुधांशो सम्पूर्णं शशपरिरहितं मण्डलं कर्णिकायां, महामोक्षद्वारं श्रियमभिमतशीलस्य शुद्धेन्द्रियस्य॥ षड्चक्रनिरूपणम् ५/३०
30. षड्चक्रनिरूपणम् ६/३२
31. तदन्तश्चक्रेऽस्मिन् निवसति सततं शुद्धबुध्यन्तरात्मा, प्रदीपाभज्योतिः प्रणवविरचनारूपवर्णप्रकाशः। तदूर्ध्वे चन्द्रार्द्धस्तदुपरि विलसद्विन्दुरूपी मकारस्तदूर्ध्वे नादोऽसौ बलधवलसुधाधारसन्तानहासी॥ षड्चक्रनिरूपणम् ६/३६
32. ज्वलद्दीपाकारं तदनु च नवीनार्कबहुलप्रकाशं ज्योतिर्वा गगनधरणीमध्यमिलितम्। इह स्थाने साक्षाद् भवति भगवान् पूर्णविभयोऽव्ययः साक्षी वह्नेः शशिमिहिरयोर्मण्डल इव॥ षड्चक्रनिरूपणम् ६/३७
33. इह स्थाने विष्णोरतुलपरमामोवमधुरे, समारोप्यं प्राणं प्रमुदितमनाः प्राणनिधने।परं नित्यं देवं पुरुषमजमाद्यं त्रिजगतां, पुराणं योगीन्द्रः प्रविशति च वेदान्तविदितम्॥ षड्चक्रनिरूपणम् ६/३८

———